# ।। शुल्वसूत्रे दिक्साधनम् ।।

॥ सु-स्वागतम् ॥

प्रस्तोता – डॉ. पतञ्जलिकुमारपाण्डेयः
(वेदविभागः)
प्राध्यापक –
महर्षिपाणिनिसंस्कृतवैदिकविश्वविद्यालयः

# रज्जुसमासं वक्ष्यामः ।। 1 ।।

रज्वा’ समस्यते सङ्क्षिप्यते यः प्रदेशः स रज्जुसमासः । समासो व्यासादेरप्युपलक्षकः । रज्वा सङ्क्षिप्यते विस्तार्यते च यथा, तं प्रकारं कथयिष्याम इति भावः ।। 1 ।।

# दिक्साधनमाह

समे शङ्कु निखाय शङ्कुसम्मितया रज्वा मण्डलं परिलिख्य यत्र लेखयोः शङ्क्ग्रच्छाया निपतति तत्र शंङ्क निहन्ति सा प्राची ।। 2 ।।

समे = मुकुरजठरवत्समीकृते देर्शे शङ्कु निखाय, शङ्कसम्मितया = शङ्कतै सम्यक् मितया प्रक्षिप्तया धारितया रज्वा मण्डलं = वृत्तं परिलिख्य कृत्वा, लेखयोः मण्डलपूर्वापरदिग्गतयोर्लेखयोः यत्र यस्मिन् प्रदेशे शङ्कोरग्रस्य छाया पूवाह्ले पश्चिमरेखायां प्रविशति, अपराह्ले च पूर्वरेखायां निःसरति, तत्र = स्थलद्वये एकैकं शङ्कु निखनेत्; तयोः शङ्कोरुपरि नीता रज्जुः प्राची – पूर्वापरा दिग्भवति। प्राक्शङ्कः प्राची, पश्चिमशङ्कु प्रतीची। प्राचीशब्दस्य ससम्बन्धिकत्वात् प्रतीच्यपि लक्ष्यते ।। 2 ।।

# उदीची साधनमाह

तदनन्तरं रज्वाऽभ्यस्य, पाशौ कृत्वा, शङ्कोः, पाशौ प्रतिमुच्य दक्षिणाऽऽयम्य मध्ये शङ्कुं निहन्त्येवमुत्तरतः सोदीची ।। 3 ।।

तयोः = निखातयोः शङ्ङ्कोरन्तरम् = अन्तरालम् अन्तरालमितां भुवं रज्ज्वा मित्वा, तां रज्जुम् अभ्यस्य = द्विगुणीकृत्य, द्विगुणीकृतरज्जोरन्तयोः पाशौ कृत्वा' तौ पाशौ शङ्ङ्कोः प्रक्षिप्य, द्विगुणीकृतरज्जुमव्यं कृतचिह्न दक्षिणास्यां दिश्याकृष्य यत्र रज्जुमध्यमापतति, तत्र मध्ये मध्यचिन्हेन स्पृष्टे भूभागे शङ्कु निहन्ति सा दक्षिणा दिक्। एवमुत्तरस्यां दिशि द्विगुणितरज्जुमाकृष्य मध्यभागे शङ्कु निहन्ति मुद्गरेण, सा उदीची दिग्भवति ।। 3 ।।

क्षेत्रसाधनाय परिभाषामाह रज्ज्वन्तयोः पाशौ करोति ।। 4 ।।

अन्यत्रापि क्षेत्रमानार्थं या रज्जुरुपादीयमाना भवेत तत्र सर्वत्रापि रज्जुमात्रे तस्या अन्तयोः पाशौ कुर्यान्नियमेन ।। 4 ।।

# श्रोण्यसं निरञ्छन-संख्या-समास

## भङ्गेषु लक्षणानि ।। 5 ।।

वेद्यादेर्नैर्ऋत्य-वायव्यकोणौ श्रोणी, आग्नेयैशानकोणा-वंसावुच्येते । निरञ्छनं वक्ष्यमाणलक्षणम् (1112)। सङ्ख्ययोः प्रमाणरज्ज्वभ्यासरज्ज्वोर्यः समासः संयोग एकीकरणम्, में तस्य भङ्गो = विभागः संख्यासमासभङ्गः । अर्थाद् द्विगुणारज्ज्वा मध्ये यो बिन्दु स एवं सङ्ख्यासमासभङ्गपदवाच्यः । हेतु इष्टक्षेत्रायाममिता रज्जुः, तावत्परिमाणा द्वितीया रज्जुरभ्यासरज्जुरित्युच्यते । श्रोणी च अंसौ च निरञ्छनं च सङ्ख्यासमासभङ्गश्च, तेषु लक्षणानि = चिन्हानि कुर्यात। अत्र पूर्व श्रोण्यादिपदानि श्रोण्यादिमापकरज्जूपराणि । तेन क्षेत्रमानार्थं क्षेत्रद्विगुणां रज्जुमादाय तत्र श्रोणिचिह्नम्, अंसचिह्न, निरञ्छनचिह्न सङ्ख्यासमासभङ्गचिह्नं च कुर्यादित्यर्थः ।।5।।

# याग विहारसाधनम्

## प्राच्यन्तयोः, शङ्कं निहन्ति ।। 6 ।।

प्राची पूर्वा दिक् । अन्तः प्रतीची। प्राची च अन्तश्च प्राच्यन्तौ, सम तयोः शङ्कं निहन्यात् । इष्टक्षेत्रे यावती प्राची इष्यते, यथा- दर्शपौर्णमासवेदिः "व्यरत्निं प्राचीम्" (21611) इत्यनेन त्र्यरत्निदीर्घा विहिता, यथा च ज्योतिष्टयेवेदिः "पुरस्तात्- में त्रिर्ट०शति" (81318) इति षड्विंशत्प्रक्रमदीर्घा विहिता, तत्र सर्वत्र तावत्याः पूर्वापरान्तयोः शङ्कं निखनेदिति भावः ।।6।।

# कोणेषु शंकुनिखननमाह

श्रोण्यं सयोश्च ।। 7 ।।

श्रोणिद्वयेऽसद्वये च शङ्कु
निखन्याद्वक्ष्यमाणविधिना। सर्वत्र क्षेत्रमापने
कोणेषु शङ्कुनिखननमिति भावः ।। 7 ।।

# श्रोण्यंश – साधनप्रकारः

**शङ्क्वोः पाशौ प्रतिमुच्य निरञ्छनेन गृहीत्वा**
**दक्षिण-पूर्वां दिशं हन्ति ।। 8 ।।**

“प्राच्यन्तयोः शङ्क निहन्ति” (116) इत्यनेन यौ पूर्वापरौ शङ्क निहतौ, तयोः शङ्क्रोर्द्विगुणिताया रज्वा अन्तयोः कृतौ पाशौ प्रतिमुच्य वक्ष्यमाणलक्षणेन निरञ्छनसंज्ञकेन चिन्हेन रज्जुं गृहीत्वा आग्नेयीं दिशं प्रति आकर्षेत्, तत्रांसचिन्हे शङ्कुर्देयः । एवं कृते सति क्षेत्रप्रमाणतिर्यङ्मानीकं पादोनक्षेत्रप्रमाण- पार्श्वमानीकं सपादक्षेत्रप्रमाणाक्ष्णयाकं त्र्यस्त्रि क्षेत्रं समुत्पद्यते । इदं च व्यस्त्रिक्षेत्रसमुत्पादनमंससाधनार्थम् । प्रदर्शितपार्श्वमानी- रूपायां रज्वामेव अंससाधनार्थं शङ्कु दद्यात् इति “प्रमाणार्द्धे समचतुरस्त्रस्य शङ्कः” (1116) इत्यादिना स्वयमेव वक्ष्यति । अत्र निरञ्छनचिह्नमंसचिह्नसमीपवर्ति कर्त्तव्यम्’ ।। 8 ।।

## एवमुत्तरतः ।।9।।

एवं = शङ्क्वोः पाशौ प्रतिमुच्य
निरञ्छनेन रज्जुं गृहीत्वा उत्तरत
ईशान्यां रज्जुमाकृषेत्,
तत्रोत्तरांसचिन्हेऽपरः शङ्कुर्देय ।
अत्राप्युत्तरांससाधनाय पूर्ववत् त्र्यस्त्रि
क्षेत्रमुत्पद्यते ।।9।।

# विपर्यस्येतरतः ।। 10 ।।

इतरशब्देन क्षेत्रस्य पश्चिमप्रान्त उच्यते। विपर्यस्येत्यनेन रज्जु पाशयोर्विपर्यास उच्यते। तेनायमर्थः। इतरतः पश्चिमभागे विपर्यस्य = रज्जुपाशौ परिवर्त्य पूर्वशङ्कुपाशं प्रतीचीशङ्कौ, प्रत्यक्पाशं च पूर्वशङ्कौ प्रक्षिप्य निरञ्छनेन नैर्ऋत्यकोणे रज्जुमाकृष्य तत्र शङ्कुर्देयः, सा दक्षिणा श्रोणिः। एवं वायव्यकोणे चाकृष्य शङ्कुर्देयः, सा उत्तरा श्रोणिः। एते शङ्कवः प्राच्यन्तयोरित्यादिसूत्रद्वयेनोक्ताः (6-7)। तेन पूर्वोक्तप्रकारं त्र्यस्त्रि क्षेत्रमुत्पद्यते श्रोणिसाधनार्थम्। पाशविपर्ययेन निरच्छन- चिह्न प्रत्यक्श्रोणिचिह्नसमीपवर्ति भवति ।। 10 ।।

# ससमाधिः सर्वत्र ।। 11 ।।

सर्वत्र = समदीर्घचतुरस्त्रक्षेत्रेषु “रज्ज्वन्तयोः पाशौ करोति” (113) इत्यादिना स= पूर्वोपदिष्ट एवं प्रकार समाधिः = साधनोपायो बोध्यः ।। 11 ।।


धन्यवाद